# MT

Seat No.

2018 .... .... 1100

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - III**

**Time : 3 Hours** **(Answer Paper)** **Marks : 100**

**प्रथमः विभागः - सुगमसंस्कृतम् ।**

उ.१ अ) **चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** ४

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ |  | २ |  | ३ |  | ४ | मरीचिका  | ५ |  |
| | **सञ्चिका** | | **राङ्कवम्** | | **अवलेहः** | | **कटुः** | | **निर्वापयति** |

उ.१ आ) **सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २)** २

१. ५८ - **अष्टपञ्चाशत् ।** २. चतुस्सप्ततिः - **६४**

३. १८ - **अष्टादश ।**

उ.१ इ) **स्तम्भमेलनं कुरुत ।** २

| | अ | ब |
|---|---|---|
| १. | सपाद-पञ्चवादनम् | ०५:१५ |
| २. | विंशत्यधिक-पञ्चवादनम् | ०५:२० |
| ३. | पञ्चविंशत्यधिक-त्रिवादनम् | ०३:२५ |
| ४. | पञ्चत्रिंशदधिक-अष्टवादनम् | ०८:३५ |

उ.१ ई) **वासर - तालिकां पूरयत । (केऽपि २)** २

| ह्यः | | अद्य | | श्वः | | परश्वः |
|---|---|---|---|---|---|---|
| बुधवासरः | ← | गुरुवासरः | → | **शुक्रवासरः** | → | शनिवासरः |

| | | |
|---|---|---|
| उ.१ | उ) **उदाहरणद्वयं लिखत । (६ तः ५)** | ५ |
| १. | दीर्घस्वरौ - **ई, ऊ, ॠ, आ ।** | |
| २. | ऋकारान्तस्य - **पितृ, मातृ ।** | |
| ३. | कण्ठयौ - **क्, ख्, ग्, घ्, ङ् ।** | |
| ४. | नपुंसकलिङ्गस्य - **वन, वारि, मधु, पयस् ।** | |
| ५. | प्रथमगणस्य धातू - **पठ्, लभ् ।** | |
| ६. | दशमगणस्य धातू - **पूज्, कथ् ।** | |
| | **द्वितीयः विभागः - गद्यम् ।** | |
| उ.२ | **अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** | |
| १. | **अवबोधनम् । ( ४ तः ३ )** | |
| क) | **उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** | १ |
| १) | अस्माभिः संस्कृतस्य अध्ययनं **शालायां** कृतम् । | |
| २) | केचन भरतमुनेः **नाट्यशास्त्रस्य** अध्ययनं कुर्वन्ति । | |
| ख) | **पूर्णवाक्येन उत्तरत ।** | १ |
| | शब्दोच्चारणस्य अभ्यासः **संस्कृतश्लोकादीनां पठनेन** भवति । | |
| ग) | **वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** | १ |
| | संस्कृतस्य ज्ञानम् आधुनिकभारतीयभाषाणां विश्लेषणे अतीव साहाय्यकरं भवति । - **सत्यम् ।** | |
| घ) | एषः गद्यांशः **'प्रतिपदं संस्कृतम्'** इति पाठात् उद्धृतः । | १ |
| २. | **शब्दज्ञानम् । (३ तः २)** | |
| क) | **सॉफ्टवेअरक्षेत्रे, विश्लेषणे, अभिनये, निवेदने कलाक्षेत्रे, अस्मासु, विदेशेषु, शालायाम्, यस्मिन्, कस्मिन्, क्षेत्रे ।** | १ |
| ख) | **मेलनं कुरुत ।** | १ |

| विशेषणम् | विशेष्यम् |
|---|---|
| साहाय्यकरम् | **ज्ञानम्** |
| उत्सुकाः | **जनाः** |

| | | |
|---|---|---|
| ग) | **लकारं लिखत ।** | १ |
| | तेन अभिनये निवेदने च प्रभावः वर्धते । - **लट्लकारः ।** | |
| ३. | **पृथक्करणम् ।** | २ |
| | **जालरेखाचित्रं पूरयत ।** | |
| |  | |
| उ.२ | **आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** | |
| १. | **अवबोधनम् । (४ तः ३ )** | |
| क) | **उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** | १ |
| १) | **पञ्चमे** वयसि उपनीतः सः पठनार्थं गुरुम् उपागच्छत् । | |
| २) | पठनादिकं समाप्य शङ्करः **गृहं** प्रत्यागतवान् । | |
| ख) | **पूर्णवाक्येन उत्तरत ।** | १ |
| | गुरुमुपगम्य शङ्करः **वेद-वेदाङ्गानि, विविधशास्त्राणि च** अधीतवान् । | |
| ग) | **वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** | १ |
| | शङ्करः अतीव प्रज्ञावान् बालकः । - **सत्यम् ।** | |
| घ) | **एषः गद्यांशः 'आदिशङ्कराचार्यः' पाठात् उद्धृतः ।** | १ |
| २. | **शब्दज्ञानम् । (३ तः २)** | |
| क) | **समाप्य, प्राप्य ।** | १ |
| ख) | **प्रश्ननिर्माणं कुरुत ।** | १ |
| | माता आर्याम्बा **कस्य** विवाहविषये सदैव चिन्तयति स्म ? | |

ग) मेलनं कुरुत । १

| विशेषणम् | विशेष्यम् |
|---|---|
| शङ्करः | विरक्तः |
| आर्याम्बा | चिन्तामग्ना |

३. पृथक्करणम् । २

स्थानाधारेण शब्दपेटिकां पूरयत ।

| |
|---|
| कालडीग्रामः |
| आलुवानगरम् |
| केरलप्रदेशः |
| भारतदेशः |

उ.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १) ४

१. (Then enters विश्वामित्र. Saluting the river.)

विश्वामित्र - How to cross the rive-flow ? How to save people and cows ? How shall I ask them a path for crossing ? How shall I pray for well-being of rivers.

River (Bias)- Who is this man? Why does he salute and praise us? O noble one, What is the name of the respected one? From where are you calling us?

विश्वामित्र - O mother, I am विश्वामित्र. I have come from a far along with chariots and carts. We all are eager to go to the other bank.

२. (On the stage, कीर्तनकार a person is singing कीर्तन (spiritual teaching through story telling), audience is engrossed in listening to it.)
O गङ्गा, यमुना, गोदावरी, सरस्वती, नर्मदा, सिन्धु (Indus), कावेरी. May (you all) unite on the earth.
The festival of गङ्गादशहरा commences on the tenth day of the waxing moon, in the month of ज्येष्ठ (according to Hindu calendar). The river should be worshipped on this festival.
(Note : It is believed that the holy river गङ्गा descended from the heaven on the earth on this day. Thus, this day is celebrated as गङ्गावतरणम्)

Audience - Worshipping the river? Why we should worship the river?
कीर्तनकार - Indeed, the river gives (us) life. Therefore, On this occasion, people release lamps in the river to express gratitude. By lighting the small lamp in a leaf-bowl, people offer it to the river -water.

उ.२ ई) माध्यमभाषया उत्तरं लिखत । (३ तः २) ४

१) The story 'धेनोर्व्याघ्रः पलायते।' brings smile on the faces of the readers due to the humor caused due to innocent nature of चिमणराव.It is also an excellent example of translation skills from a regional language to the ancient language of India.

Accepting the request of the circus owner, चिमणराव and Deyogue were disguised as the tiger and the bear respectively. The circus began at 10 at night. The popular programme of animal's meal together began at 12. Audience's enthusiasm raised up. Three chairs and a circular stool in the middle were arranged on the stage. चिमणराव and अब्दुल took their seats. The cow, the third animal of the show, too came on the stage. While चिमणराव and अब्दुल were disguised as the animals, the cow was a real one. As food was being arranged in front of the animals, the audience started clapping with joy and excitement. The cow was trained to perform in the show along with theearlier disguised men. But in a short while, she realised that these tiger and bear were not the usual one's. She looked at both of them with confusion and doubt. Raising her horns sheattacked them, चिमणराव tried to fear her by roaring and displaying his sharp teeth, but she didnot bother. अब्दुल beat her with this hand. With this she got angry and ran over him. The audience saw that the bear climbed on the pole of the tent and they

thought it was a part of the show. But the cow, being angry as the bear escaped, now attacked चिमणराव-the tiger. Here चिमणराव forgot the planned drama and the tiger's disguise due to fear and ran away screaming, "Help, professor, help!". Seeing the tiger being afraid of a cow and running away, the audience got confused and then realised the drama. They removed the tiger's disguise off चिमणराव's body and beat him harshly. So much so that he fell unconscious with pain. Thus, चिमणराव tried to help प्रोफेसर सर्कसवाले in his show, but it turned out to be a fiasco.

२) In the lesson, आदिशङ्कराचार्य:, two incidents of his life are given. The second event unfolds आदिशङ्कराचार्य's preaching - whosoever impards knowledge is the preceptor.

Once, आचार्य went to river गङ्गा for bathing along with his desciples. On the way, they came across a man with torn clothes and unclean body. Seeing his strange attire, a desciple warded him off. But the man impressed आचार्य with his wise speech.

The man asked desciples, whom do you word off, a soul or body? Because, the soul is a part of the lord, hence is same among all. It consists of five eternal elements; so your and mine body are not different.

शंकराचार्य bowed down to that man after listening to the real knowledge of वेदान्त from him. आचार्य being a preceptor too, considered him as गुरु; following this principle, whosoever imparts knowledge is the preceptor.

३) 'प्रतिपदं संस्कृतम्' is a dialogue in a public place. It subtly brings out that Sanskrit language is not just worth mugging up to get maximum marks in the examinations but also helps and guides us at every step of our life.

People's perception about our Sanskrit language is changing day-by-day. They have started believing that it is not just a language of rituals but it is also ज्ञानभाषा the language that bestows knowledge. Knowledge of Sanskrit helps people from various fields to acquire knowledge about there field on which sanskrit treatises are available

in ancient times. The cover pages of our text book portray the same very well.

The सुभाषिते in Sanskrit enlighten us and display the path to success. They teach us basicprinciples of life. There is a research going on in IIT to develop computer language with the help of Sanskrit. पाणिनि's अष्टाध्यायी is very useful for them. As Sanskrit is the mother of all Indian regional languages, it's knowledge helps us in analysing those regional languages too. Due to Sanskrit recitation, pronunciation of words becomes clear, which helps teachers, actors, anchors etc. in there profession for historical TV shows or cinemas, Sanskrit experts are required to research of their stories. People from medical field can alway be benefitted by shudying सुश्रुतसंहिता the ancient medical treatise.

Likewise, मयमतम् for architects, नाट्यशास्त्रम् for actors and performers, अर्थशास्त्रम् for law and order, prove to be the house guiding source. Thus, knowledge of sanskrit leads to the treasure of knowledge, that can be helpful in any other profession as well as in day to day life.

**तृतीयः विभागः - पद्यम् ।**

उ. ३ **अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

क) **पूर्णवाक्येन उत्तरं लिखत ।** १

जटायुः **तस्य तीक्ष्णनखाभ्यां चरणाभ्यां** च व्रणान् चकार ।

ख) **विशेषणानि लिखत ।** १

जटायुः - **महाबलः, पतगसत्तमः, वृद्धः ।**

ग) **रेखाचित्रं पूरयत ।** २



| | | |
|---|---|---|
| उ.३ | **आ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** | |
| क) | **पूर्णवाक्येन उत्तरं लिखत ।**<br>वैद्यः प्राणान् धनानि च हरति। | १ |
| ख) | **सन्धिविग्रहं कुरुत ।**<br>वृष्टिभिरार्द्रयन्ति - **वृष्टिभिः + आर्द्रयन्ति ।** | १ |
| ग) | **माध्यमभाषया उत्तरत ।**<br>चित्रकाव्यम् is an image poetry. Such poems show the prodigious intellect of the poets as well as arouse amusement and pleasure.<br>'रे रे चातक' is the example of poetic form named अन्योक्ति. Here the चातक bird is harbinger of monsoon and he is assumed to drink water directly from rain. So, चातक bird, considering cloud as the only resort depends on the cloud itself for water.<br>Here, a poet points out to clouds attributes and shows the difference between them. Some clouds are best givers of water, but some merely roar so a poet suggests चातक not to ask water to roaring clouds. In a way, a poetwants to indicate poor people not to beg to all. All people are not generous.<br>In brief, a poet points out to चातक bird but it is intended for poor people. Thus, अन्योक्ति is beautifully created here. | २ |
| उ.३ | **इ) पद्ये शुद्धे पूर्णे च लिखत । (क - ख तः १ तथा ग - घ तः १)** | ६ |
| १. | **क.** भिक्षुः क्वास्ति बलेर्मखे पशुपतिः किं नास्त्यसौ गोकुले<br>मुग्धे पन्नगभूषणः सखि सदा शेते च तस्योपरि ।<br>आर्ये मुञ्च विषादमाशु कमले नाहं प्रकृत्या चला<br>चेत्थं वै गिरिजासमुद्रसुतयोः सम्भाषणं पातु वः ।। | |
| | **ख.** अयं न भक्तो न च पूजको वा<br>घण्टां स्वयं नादयते तथापि ।<br>धनं जनेभ्यः किल याचतेऽयं<br>न याचको वा न च निर्धनो वा ।। | |
| २. | **ग.** राक्षसेभ्यः सुतां हृत्वा जनकस्य पुरीं ययौ ।<br>अत्र कर्तृपदं गुप्तं यो जानाति स पण्डितः ।। | |

| | | |
|---|---|---|
| | घ. कं संजघान कृष्णः का शीतलवाहिनी गङ्गा ।<br>के दारपोषणरताः कं बलवन्तं न बाधते शीतम् ।। | |
| उ.३ | **ई) माध्यमभाषया सरलार्थं लिखत । (४ तः ३)** | ६ |
| १. | Just as, all rivers enter the ocean, likewise, all religions resort to humanity. | |
| २. | Just as, different musical notes from music has a base of षड्ज (स्वर) likewise, all धर्मs resort to humanity. (Humanity is a base of all धर्मs) | |
| ३. | Just as the sun alone lightens the entire world; similarly, humanity alone illuminates all धर्मs. | |
| ४. | In the world, when a man would behave (with others) equally, following the principle of similarity of the soul then humanity would take place. | |
| | **चतुर्थः विभागः - लेखनकौशलम् ।** | |
| उ. ४ | **अ) वाक्यरचनां कुरुत ।** | |
| **क)** | **धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (५ तः ३)** | ३ |
| १. | कुप् → जननी **बालकाय** कुप्यति / क्रुध्यति । | |
| २. | वि + रम् → अयि छात्र, **स्वाध्यायात्** मा विरम । | |
| ३. | पत् → फलं **वृक्षात्** पतति । | |
| ४. | कथ् → माता **बालकाय** कथां कथयति । | |
| ५. | रक्ष् → सैनिकाः देशं **शत्रुभ्यः** रक्षन्ति । | |
| **ख)** | **अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** | २ |
| १. | आकाशे **जलधरः/ धाराधरः/ वारिदः** गर्जति । | |
| २. | का शीतलवाहिनी **विष्णुपदी/जह्नुतनया/सुरनिम्नगा** ? | |
| ३. | राजा याचकाय **द्रव्यं/वित्त/स्थापतेयं/रिक्थं/ऋक्थं/वसुः** यच्छति । | |
| ४. | **माहेयी/सौरभेयी/गौः/माता/उस्रा** लोकमाता अस्ति । | |

उ.४ **आ) ५ / ७ वाक्यात्मकं निबन्धं अथवा संवादं लिखत। (३ तः१)** ५

(१) **मम प्रियं पुस्तकम्**

श्यामची आई इति मम प्रियं पुस्तकम् । सानेगुरुजीमहोदयः तस्य लेखकः। एतत् पुस्तकं मराठीभाषायां लिखितम् । एतस्मिन् पुस्तके सानेगुरुजी- महोदयस्य बाल्यस्य प्रसङ्गाः उद्धृताः। पुस्तके मात्रा कथिताः नैकाः बोधप्रदाः कथाः सन्ति। एतत् पुस्तकं मनः सुसंस्कारयति। मातृप्रेम्णः महन्मङ्गलं स्तोत्रम् एतत् खलु। एतस्य पुस्तकस्य अनुवादः नैकभारतीयभाषासु, विदेशीयभाषासु जातः ।

(२) **भारतीयं प्रसिद्धं स्थलम्**

'मुम्बई' इति भारतदेशस्य प्रसिद्धं नगरम् अस्ति। 'मुम्बई' इति महाराष्ट्रराज्यस्य राजधानी। मुम्बईनगरे मुम्बादेव्याः मन्दिरं वर्तते। विविधप्रान्तेभ्यः जनाः उपजीविकां साधयितुं मुम्बईनगरम् आगच्छन्ति। गेटवे ऑफ इंडिया, नेहरुताराङ्गणं, मत्स्यालयः एतादृशानि विविधानि रम्याणि पर्यटनस्थलानि। गतिशीलं जीवनं मुम्बईनगर्याः वैशिष्ट्यम्। नैकान् उत्सवान् सर्वधर्मीयाः सोत्साहं सम्पादयन्ति ।

(३) **मम प्रिया भाषा**

संस्कृतभाषा विश्वे प्राचीनतमा। संस्कृतभाषा सर्वभारतीयभाषाणां जननी। संस्कृतभाषा ज्ञानस्य महत् भाण्डारम्। संस्कृतभाषायां वेदपुराणादिग्रन्थाः, विविधशास्त्रग्रन्थाः सन्ति। एषा भाषा काव्यनाटकसुभाषितैः समृद्धा। संस्कृतभाषायाः अध्ययनं संस्कृतिरक्षणार्थं संवर्धनार्थं च आवश्यकम्। संस्कृतभाषा सङ्गणकयोग्या अस्ति इति सिद्धम्। सत्यम् उक्तम् - 'भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।'

**अथवा**

(१) **आपणसंवादः**

विक्रेता - आगच्छतु आगच्छतु । शाकानि क्रीणातु । आगच्छतु आगच्छतु ।
गृहिणी - अयि भोः, कानि कानि शाकानि विद्यन्ते ?
विक्रेता - अस्ति अत्र कारवेल्लम्, कर्कटी, भिण्डिः, वृन्ताकं, गृञ्जनकं च। किम् इच्छति ?
गृहिणी - अस्तु, किलोपरिमितं यच्छतु। भिण्डिः अपि अर्धकिलोमितम् ।
विक्रेता - अवश्यम्। इतोऽपि किम् आवश्यकम्? शीघ्रं वदतु ।
विक्रेता - अपि स्यूतः आनीतः ?
गृहिणी - न भोः! प्लास्टिकस्यूतं ददातु ।
विक्रेता - क्षम्यताम्। प्लास्टिक - उपयोगः प्रदूषणकारकः। अहं प्लास्टिकस्यूतं न स्थापयामि एव ।
गृहिणी - अधुना किं करणीयम् ?
विक्रेता - वस्त्रस्यूतम् अपि क्रीणातु। मूल्यं केवलं पञ्चरूप्यकाणि ।
गृहिणी - बहु उत्तमम्। ददातु ।

(२) **रुग्णालयसंवादः**

विकासः- वैद्य, अधुना मम स्वास्थ्यं कदा सम्यक् भविष्यन्ति ?

वैद्यः - श्रुणु वारंवारम् उपाहारगृहे शीघ्रभोजनादिकमपि त्याज्यमेव ।

विकासः- किमर्थं त्याज्यम्? तदन्नं तु अतीव स्वादयुक्तम्। मह्यमतीव रोचते तत् ।

वैद्यः - सत्यं स्वादयुक्तं तदन्नं किन्तु न स्वास्थ्याय। नातितीक्ष्णं न अति तैलयुक्तम् अन्नं भक्षयेत्। सात्त्विकम् उष्णं च अन्नं स्वास्थ्याय कल्पते। प्रदूषणमुक्तं वातावरणं शुद्धान्नं च स्वास्थ्यकरं भवति मानवानां कृते ।

विकासः- अधुना अहं वारंवारम् उपाहारगृहे शीघ्रभोजनं न करोमि। स्वास्थ्यस्य कृते यत् आवश्यकम् अस्ति तदैव करोमि ।

(३) **दूरवाणीसंवादः**

माता - पुत्रि! अद्य विद्यालये किम् आसीत्?

कन्या - मातः! अस्माकं विद्यालये परश्वः वार्षिकोत्सवः भविष्यति। अद्य तस्य एव सज्जा प्रचलति स्म।

माता - तस्मिन् उत्सवे के के कार्यक्रमाः भविष्यन्ति?

कन्या - जननि! तस्मिन् मम नृत्यं, हास्यनाटकं च भविष्यन्ति।

माता - मुख्यातिथिः कः भविष्यति?

कन्या - मुख्यातिथिः राज्यपालमहोदयः भविष्यति। सः एव पुरस्कारान् वितरिष्यति।

माता - पुत्रि! शोभनम्। आशास्यते यत् त्वम् अपि पुरस्कारं प्राप्स्यसि।

उ.४ **इ) निर्दिष्टां कृतीं कुरुत ।**

**मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत ।** ५

१. रमणीये प्रातःकाले सर्वे जनाः उत्साहिताः दृश्यन्ते।
आकाशे सूर्योदयः भवति, खगाः उड्डयन्ते।
ग्रामे नैके वृक्षाः सन्ति।
एका महिला सूत्रकर्तनयन्त्रे सूत्रं कर्तयति।
अन्या महिला जलघटं मस्तके धृत्वा चलति।
तां दृष्ट्वा शुनकः भषति।
कुम्भकारः कुम्भान् रचयति।
गोपालकः धेनुं दोग्धि। अन्या धेनुः तृणं खादति।
दुग्धविक्रेत्री दुग्धपात्राणि गृहीत्वा चलति।
केचित् जनाः जलं पूरयन्ति।

**अथवा**

उ.४ **इ) संस्कृतानुवादं कुरुत । (८ तः ५)**

१. बालिका मापिकया माति ।
२. माता रोटिकां वेल्लयति ।
३. सिंहः उच्चैः गर्जति ।
४. कृपया तत् द्वारम् उद्घाटयतु ।
५. बालकाः जले क्रीडन्ति ।
६. छात्राः ग्रन्थं पठन्ति ।
७. पशवः पक्षिणः च वने निवसन्ति ।
८. सायङ्काले पञ्चवादने पिता कार्यालयात् आगच्छति ।

**पञ्चमः विभागः - भाषाभ्यासः ।**

उ.५ **अ) तालिकापूर्तिं कुरुत ।**

१. **नामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| **शाखी** | शाखिनौ | **शाखिनः** | प्रथमा |
| रज्जवे | **रज्जुभ्याम्** | **रज्जुभ्यः** | चतुर्थी |
| **पित्रा** | पितृभ्याम् | **पितृभिः** | तृतीया |

२. **सर्वनामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| अस्य | **अनयोः-एनयोः** | **एषाम्** | षष्ठी |
| **माम् - मा** | आवाम्-नौ | **अस्मान् - नः** | द्वितीया |
| **सा** | **ते** | ताः | प्रथमा |

३. **क्रियापदतालिका । (६ तः ४)** २

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|---|
| लङ् | **अभवत्** | **अभवताम्** | अभवन् | प्रथमः पुरुषः |
| लृट् | गमिष्यसि | **गमिष्यथः** | **गमिष्यथ** | मध्यमः पुरुषः |
| लट् | **पश्यामि** | पश्यावः | **पश्यामः** | उत्तमः पुरुषः |

४. **धातुसाधित-विशेषण- तालिका । (६ तः ४)** २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| प्रच्छ् - पृच्छ् (६ प.प.) | **पृष्टः** | पृष्टवान् | **प्रच्छनीयः** | पृच्छन् |
| रम् (१ आ.प.) | रतः | **रतवान्** | रन्तव्यः | **रममाणः** |
| कृ (८ उ. प.) | **कृतः** | **कृतः** | कार्यः | कुर्वाणः |

उ.५ **आ) निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

१) **योग्यपर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३)** ३

१. तेन **त्रिवारं** प्रयोगः कृतः ।

२. भोजने **षट्सु** रसेषु मधुरः रसः मम प्रियः ।

३. दिनस्य **नववारं** लोकयानम् आगच्छति ।

४. भवने मम गृहं **सप्तमे** तले वर्तते ।

५. पौषमासः संवत्सरस्यः **दशमः** मासः ।

२) **समासानां तालिकापूर्तिं कुरुत । (५ तः ३)** ३

| | समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|---|
| १. | यथेच्छम् | **इच्छाम् अनुसृत्य ।** | अव्ययीभावः समासः |
| २. | शेगावस्थानकम् | शेगाव इति स्थानकम् । | **कर्मधारयः समासः** |
| ३. | जलदः | **जलं ददाति इति ।** | उपपद-तत्पुरुषः समासः |
| ४. | नीलकण्ठः | **नीलः कण्ठः यस्य सः ।** | बहुव्रीहि-समासः |
| ५. | भुजगयमिताः | भुजगैः यमिताः । | **तृतीया-तत्पुरुषः समासः** |

३) **समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत । (५ तः ३)** ३

१. शीघ्रम् - **झटिति, सत्वरम् ।** २. व्याघ्रः - **व्यालः, पञ्चनखः ।**

३. उत्सुकाः × **अनुत्सुकाः ।** ४. मखः - **यागः, क्रतुः, यज्ञः ।**

५. समाप्य × **आरभ्य, प्रारभ्य ।**

४) **सूचनानुसारं कृतीः कुरुत । (५ तः ३)** ३

क. वैद्यः प्राणान् **अहरत्** ।

ख. अपि त्वं संस्कृतं **पाठयसि** ?

ग. सः महोदयम् **उपगच्छति** वदति च ।

घ. **ते** पठनार्थं **गुरुमुपागच्छन्** ।

ङ. आगमिष्यामि - **लृटलकारः**

| | | |
|---|---|---|
| ५) | **वाक्यं शुद्धं कुरुत । (५ तः ३)** | ३ |
| १. | भवान् किं **करोति** ? | |
| २. | शूरः रामः **गच्छति** । | |
| ३. | **निर्धनं** पुरुषं तु मित्राणि अपि त्यजन्ति । | |
| ४. | **एका** बालिका पाठं न अस्मरत् । | |
| ५. | भारतदेशे **विशालानि** अरण्यानि सन्ति । | |
| | **षष्ठः विभागः - अपठितम् ।** | |
| उ. ६ | **अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)** | |
| १) | **एकवाक्येन उत्तरत ।** | १ |
| | **ऋषिः ऋष्यशृङ्गः** दशरथस्य जामाता । | |
| २) | **प्रातिपदिकं लिखत ।** | १ |
| | १) ननान्दा - **ननान्दृ** | |
| | २) शान्तायाः - **शान्ता** | |
| ३) | **वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत ।** | १ |
| | सीता दशरथस्य स्नुषा । - **सत्यम् ।** | |
| ४) | **आसीत्, अभवत् ।** | १ |
| ५) | **माध्यमभाषया सरलार्थं लिखत ।** | १ |
| | There was a daughter of दशरथ named शान्ता. | |
| ६) | **नगरी, दशरथः, नृपालः, पिता, दुहिता, सा, ऋषिः ।** | १ |
| उ. ६ | **आ) - १) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** | |
| क) | **एकवाक्येन उत्तरत । (२ तः १)** | १ |
| (१) | सर्वश्रेष्ठं दानं **विद्यादानम्** । | |
| (२) | अन्नेन **क्षणिका तृप्तिः** भवति । | |
| ख) | **समानार्थकशब्दान् लिखत ।** | १ |
| | परम् - **श्रेष्ठम्** | |

| | | |
|---|---|---|
| उ. ६ | आ) - २) जालचित्रं पूरयत । | २ |
| | क्षणिका तृप्तिः — अन्नेन | |
| | श्रेष्ठं दानम् — विद्यादानम् | |

*****